# संस्कृत वार्ता:

## 02/04/2026

## सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य अवधानं दत्तं यत् भारतस्य द्रुतगत्या परिवर्त्य-मानानां आकांक्षानां कृते न केवलं कार्यसाधकस्य प्रत्युत नागरिक-केन्द्रितस्य प्राशासनिक-प्रतिरूपस्य आवश्यकता वर्तते इति।

· पश्चिमैशिया-संघर्षमध्ये जायमानस्य वैश्विक-अशोधिततैलस्य आपूर्तौ समागतायां बाधायां प्रशासनेन जूनमासस्य त्रिंशत् दिनाङ्कपर्यन्तं प्रमुखेषु पेट्रोरसायन-उत्पादेषु सीमाशुल्कं विमोचितम्।

· विगते वित्तीय-वर्षे भारतस्य रक्षा-निर्यात: चतुर्विंशत्यधिकचतुःशतोत्तर अष्टत्रिंशत् सहस्र कोटि-रूप्यकाणाम् ऐतिहासिकं स्तरं प्राप्तवान्।

· पश्चिम-बङ्गाल-राज्यस्य मालदा-मण्डले 'विशेष-गहन-पुनरीक्षण' कार्ये संलग्नानां सप्त-न्यायिक-अधिकारिणां 'बन्धक' रूपेण निरोधस्य घटना निन्दनीया इति सर्वोच्च-न्यायालयः अद्य अघोषयत्।

· पश्चिम-बङ्गाल-विधानसभा-निर्वाचनाय द्वितीय-चरणस्य नामाङ्कन-प्रक्रिया अद्य अधिसूचनया आरब्धा।

· अद्य सायं 'इण्डियन प्रीमियर लीग' स्पर्धायां 'कोलकाता नाइट राइडर्स' दलम् 'सनराइजर्स हैदराबाद' दलेन सह स्पर्धां करिष्यति।

<u>पीएम-कर्मयोगी</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य अवधानं दत्तम् यत् भारतस्य द्रुतगत्या परिवर्त्यमानानां आकांक्षानां कृते न केवलं कार्यसाधकस्य प्रत्युत नागरिक-केन्द्रितस्य प्राशासनिक-प्रतिरूपस्य आवश्यकता वर्तते इति। प्रधानमन्त्री ऐषमः कर्मयोगी-साधना-सप्ताह इत्याख्ये सम्बोधनपरे दृश्याङ्कन-सम्बद्धे सन्देशे एतत् सर्वमपि उक्तवान्।

जीवनस्य सुगमतायाः गुणवत्तायाः च परिष्कारः शासनस्य प्राथमिकः केन्द्रबिन्दुः भवेत् इत्यपि प्रधानमन्त्री निगदितवान् । प्रौद्योगिक्याः महत्त्वं प्रतिपादयन् प्रधानमन्त्री विगतैकादशवर्षेषु शासनस्य, सेवा-वितरणस्य, अर्थव्यवस्थायाः अथ प्राशासकीय-कार्येषु प्रौद्योगिक्याः गहन-एकीकरणं प्रति सर्वान् इंगितवान्।

अवधातव्यमस्ति यत् अद्यप्रभृति एकसप्ताहाभ्यन्तरे कर्मयोगी-साधना-सप्ताहइत्याख्यः कार्यक्रमः आरब्धः। कार्मिक-प्रशिक्षण-विभागेन, क्षमता-निर्माण-आयोगेन, कर्मयोगी-भारतेन च सामूहिकरूपेण अयं कार्यक्रमः आयोज्यते। अस्य कार्यक्रमस्य उद्देश्यं सम्पूर्णे देशे नागरिकसेवानां क्षमतायाः, निष्पादनस्य, कार्यक्षमतायाः च निर्माणम् इति ।

## पश्चिमैशियासंघर्ष

पश्चिमैशिया-संघर्षमध्ये जायमानस्य वैश्विक-अशोधित-तैलस्य आपूर्तौ समागतायां बाधायां प्रशासनेन जूनमासस्य त्रिंशत् दिनाङ्कपर्यन्तं प्रमुखेषु पेट्रोरसायन-उत्पादेषु सीमाशुल्कं विमोचितम्। वित्तमन्त्रालयः संसूचितः यत्, देशीय-उद्योगेषु आवश्यक-पेट्रोरसायनानां उपलब्धतां सुनिश्चितुं अस्थायी-उपायरूपेण एषः उपायः स्वीकृतः अस्ति अस्ति। एतेन सम्बद्ध-क्षेत्रेषु व्ययस्य भारः न्यूनीभवति, आपूर्तिः स्थिरी-भवति, उपभोक्तृभ्यः आश्वस्तिः च प्राप्यते इति मन्त्रालयः अवदत्।

मन्त्रालयः एतदपि अवदत् यत्, आहत्य चत्वारिंशत् सङ्ख्याकनि वस्तूनि सीमाशुल्कात् मुक्तानि सन्ति इति। एतेषु मेथनाल्, अमोनिया, टोलुन्, स्टैरिन्, डैक्लोरो-मीथेन्, विनैल् क्लोरैड् मोनोमर्स् इत्येतानि सन्ति।

## भारतस्य रक्षा-निर्यात:

विगते वित्तीय-वर्षे भारतस्य रक्षा-निर्यात: चतुर्विंशत्यधिकचतुःशतोत्तर अष्टत्रिंशत् सहस्र कोटि-रूप्यकाणाम् ऐतिहासिकं स्तरं प्राप्तवान्। एषा वृद्धि: गतवर्षस्य तुलनायां द्वाषष्टिः दशांश षट्षष्टिः प्रतिशतं अधिकास्ति। रक्षा-मन्त्रालयानुसारं अस्यां सफलतायां 'सार्वजनिक-क्षेत्रस्य उपक्रमाणां' सहभागिता चतुः पंचाशत् दशांश अष्ट चत्वारि प्रतिशतं तथा च 'सर्वकारीयेतर-क्षेत्रस्य' योगदानं पंचचत्वारिंशत् दशांश एकं षट् प्रतिशतं वर्तते। एषा तीव्रा वृद्धि: भारतीय-रक्षा-

उत्पादानां वैश्विक-स्वीकार्यतां तथा अन्ताराष्ट्रीय-आपूर्ति-शृङ्खलासु भारतस्य सुदृढ-स्थितिं प्रदर्शयति। रक्षामन्त्री राजनाथ सिंह: एतां उपलब्धिं श्लाघनीयं उक्तवान् यत् भारतं रक्षा-उपकरणानां निर्माणाय विश्वस्य प्रमुखं भवितुं वेगेन अग्रे सरति।

## अपश्चिम-बङ्गाल-राज्ये न्यायिक-अधिकारिणां निरोधः

पश्चिम-बङ्गाल-राज्यस्य मालदा-मण्डले 'विशेष-गहन-पुनरीक्षण' कार्ये संलग्नानां सप्त-न्यायिक-अधिकारिणां 'बन्धक' रूपेण निरोधस्य घटना निन्दनीया इति सर्वोच्च-न्यायालयः अद्य अघोषयत्। न्यायालयः अस्याः घटनायाः स्वतः संज्ञानं स्वीकृत्य राज्य-प्रशासनस्य तीव्रां आलोचनां कृतवान्। मुख्य-न्यायाधीशस्य सूर्यकान्तस्य नेतृत्वे पीठानेन राज्यस्य मुख्य-सचिवः, आरक्षिमहानिदेशकः च आगामि-षड्-दिनाङ्के आभासीय-माध्यमेन उपस्थितये आदिष्टाः। न्यायालयेन निर्वाचन-आयोगः अस्मिन् विषये सी.बी.आई. अथवा एन.आई.ए. माध्यमेन अन्वेषणं कर्तुं अनुमतः। अपि च, अधिकारिणां सुरक्षा-सुनिश्चयाय देशस्य कुत्रचित् अपि केन्द्रीय-बलानां याचनां कर्तुं आयोगः स्वतन्त्रः अस्ति। पीठानेन टिप्पणी कृता यत् एषा घटना न्यायिक-अधिकारिणां मनोबलं अपाकर्तुं तथा निर्वाचन-प्रक्रियां बाधयितुं कृतः 'सुनियोजित-प्रयासः' दृश्यते।

## पश्चिम-बङ्गाल-निर्वाचनम्

पश्चिम-बङ्गाल-विधानसभा-निर्वाचनाय द्वितीय-चरणस्य नामाङ्कन-प्रक्रिया अद्य अधिसूचनया आरब्धा। अस्मिन् चरणे अस्मिन् मासे एकविंशति दिनाङ्के द्विचत्वारिं-शतधिक निर्वाचन-क्षेत्रेषु मतदानं भविष्यति। अभ्यर्थिनः एप्रिल मासस्य प्रथम दिनांकपर्यन्तं स्वकीयं नामाङ्कन-पत्रं दातुं शक्नुवन्ति, येषां परीक्षणं अनन्तरं भविष्यति। नाम प्रत्यावर्तनं कर्तुं अन्तिमा तिथिः एप्रिल मासस्य त्रयोदश दिनांकः अस्ति। अपरपक्षे, असम-केरळ-पुदुच्चेरी राज्येषु एक-चरणीय-मतदानस्य कृते प्रचार-कार्यं तीव्रमभवत्। अद्य अस्माकं निर्वाचन-क्षेत्र-विशेषे केरळ-राज्यस्य कोट्टायम-मण्डलस्य 'काञ्जिरप्पल्ली' क्षेत्रस्य उपरि दृष्टिः अस्ति, यत्र चतुर्णाम् प्रमुखाभ्यर्थिनां मध्ये प्रबला स्पर्धा वर्तते।

## इण्डियन प्रीमियर लीग

अद्य सायं 'इण्डियन प्रीमियर लीग' स्पर्धायां 'कोलकाता नाइट राइडर्स' दलम् 'सनराइजर्स हैदराबाद' दलेन सह स्पर्धां करिष्यति। एषा क्रीडा सायङ्काले सार्धसप्त वादने आरप्स्यते।

ह्यः रात्रौ 'दिल्ली कैपिटल्स' दलेन 'लखनऊ सुपर जायंट्स' दलम् षड्-स्तोभैः पराजितम्।

## संसदीय-कार्य-मन्त्री किरेन-रिजिजू

संसदीय-कार्य-मन्त्री किरेन-रिजिजू महोदयः अद्य राज्यसभाम् असूचयत् यत् महिला-आरक्षण-विधेयकस्य उपरि सविस्तरं चर्चायै संसदः कार्यचरणम् अद्य आरभ्य स्थगिता भविष्यति सममेव च सप्ताहद्वय-त्रयस्य अनन्तरं पुनः प्रारप्स्यते। कांग्रेस-दलस्य जयराम रमेश महोदयस्य प्रश्नस्य उत्तरं यच्छन् रिजिजू-महोदयः उक्तवान् यत् सर्वकारेण अस्मिन् विषये अशीतिः प्रतिशत-दलेभ्यः अधिकैः सह परामर्शः कृतः । तेन एतदपि स्पष्टीकृतं यत् सर्वकारः किमपि स्वयमेव निर्णयं न स्वीकरोति, अपितु सर्वेषां दलानां साहाय्येन सर्वसम्मतिं निर्मातुं प्रयत्नं करोति।

अपरपक्षे, राज्यसभायां विपक्षस्य नेता मल्लिकार्जुन-खरगे महोदयः अस्मिन् विषये सर्वदलीयोपवेशनम् आकारयितुं याचनां कृतवान् येन सर्वे स्वकीयं मतं उपस्थापयितुं शक्नुयुः। तेन उक्तं यत् कांग्रेस-दलं महिला-आरक्षणस्य विरुद्धं नास्ति।

।। इति वार्ता: ।।